॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय ७२

स मुहूर्तादुपश्रुत्य देवर्षिरमितप्रभः ।
स्वमाश्रमं शिष्य वृतः क्षुधार्तः संन्यवर्तत ॥ १॥

सोऽपश्यदरजां दीनां रजसा समभिप्लुताम् ।
ज्योत्स्नामिवारुणग्रस्तां प्रत्यूषे न विराजतीम् ॥ २॥

तस्य रोषः समभवत्क्षुधार्तस्य विशेषतः ।
निर्दहन्निव लोकांस्त्रीञ्शिष्यांश्चेदमुवाच ह ॥ ३॥

पश्यध्वं विपरीतस्य दण्डस्याविदितात्मनः ।
विपत्तिं घोरसङ्काशां क्रुद्धामग्निशिखाम् इव ॥ ४॥

क्षयोऽस्य दुर्मतेः प्राप्तः सानुगस्य दुरात्मनः ।
यः प्रदीप्तां हुताशस्य शिखां वै स्प्रष्टुमिच्छति ॥ ५॥

यस्मात्स कृतवान्पापमीदृशं घोरदर्शनम् ।
तस्मात्प्राप्स्यति दुर्मेधाः फलं पापस्य कर्मणः ॥ ६॥

सप्तरात्रेण राजासौ सभृत्यबलवाहनः ।
पापकर्मसमाचारो वधं प्राप्स्यति दुर्मतिः ॥ ७॥

समन्ताद्योजनशतं विषयं चास्य दुर्मतेः ।
धक्ष्यते पांसुवर्षेण महता पाकशासनः ॥ ८॥

सर्वसत्त्वानि यानीह स्थावराणि चराणि च ।
महता पांसुवर्षेण नाशं यास्यन्ति सर्वशः ॥ ९॥

दण्डस्य विषयो यावत्तावत्सर्वसमुच्छ्रयः ।
पांसुभुत इवालक्ष्यः सप्तरात्राद्भविष्यति ॥ १०॥

इत्युक्त्वा क्रोधसन्तप्तस्तमाश्रमनिवासिनम् ।
जनं जनपदान्तेषु स्थीयतामिति चाब्रवीत् ॥ ११॥

श्रुत्वा तूशसनो वाक्यं स आश्रमावसथो जनः ।
निष्क्रान्तो विषयात्तस्य स्थानं चक्रेऽथ बाह्यतः ॥ १२॥

स तथोक्त्वा मुनिजनमरजामिदमब्रवीत् ।
इहैव वस दुर्मेधे आश्रमे सुसमाहिता ॥ १३॥

इदं योजनपर्यन्तं सरः सुरुचिरप्रभम् ।
अरजे विज्वरा भुङ्क्ष्व कालश्चात्र प्रतीक्ष्यताम् ॥ १४॥

त्वत्समीपे तु ये सत्त्वा वासमेष्यन्ति तां निशाम् ।
अवध्याः पांसुवर्षेण ते भविष्यन्ति नित्यदा ॥ १५॥

इत्युक्त्वा भार्गवो वासमन्यत्र समुपाक्रमत् ।
सप्ताहाद्भस्मसाद्भूतं यथोक्तं ब्रह्मवादिना ॥ १६॥

तस्यासौ दण्डविषयो विन्ध्यशैवलसानुषु ।
शप्तो ब्रह्मर्षिणा तेन पुरा वैधर्मके कृते ॥ १७॥

ततः प्रभृति काकुत्स्थ दण्डकारण्यमुच्यते ।
तपस्विनः स्थिता यत्र जनस्थानमथोऽभवत् ॥ १८॥

एतत्ते सर्वमाख्यातं यन्मां पृच्छसि राघव ।
सन्ध्यामुपासितुं वीर समयो ह्यतिवर्तते ॥ १९॥

एते महर्षयः सर्वे पूर्णकुम्भाः समन्ततः ।
कृतोदको नरव्याघ्र आदित्यं पर्युपासते ॥ २०॥

स तैरृषिभिरभ्यस्तः सहितैर्ब्रह्मसत्तमैः ।
रविरस्तं गतो राम गच्छोदकमुपस्पृश ॥ २१॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com